# अथर्वदधातुरप्रत्ययः प्रातिपदिकम् इति सूत्रार्थचिन्तनम्

**सुनील उपाध्यायः**

*सहा.प्राध्यापकः, श्रीपरमानन्द–संस्कृत–गुरुकुल–विद्यापीठम्*

sunilupadhayay50@gmail.com

**लेखसारः**

*व्याकृतिः व्याकरणम् अर्थात् व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः विविच्य साधुशब्दाः निष्पाद्यन्ते अनेन इति व्याकरणपदस्य व्युत्पत्तिलभ्य अर्थः । अधुना व्याकरणशस्त्रपरम्परायां पाणिनीयपरम्परा एव प्रचलन्ती अस्ति । प्रक्रियानुसारेण व्याकरणस्य अध्ययनाध्यापनक्रमे तत्र वैयाकरणसिद्धन्तकौमुद्यां पञ्चसन्धिं समाप्य षड्लिङ्गस्य आरम्भे प्रथमसूत्ररूपेण "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रस्य व्याख्यानं विहितं दीक्षितेन । अनेन सूत्रेण महासंज्ञारूपेण प्रथिता महासंज्ञा प्रतिपदिकसंज्ञा क्रियते । प्रतिपदिकसंज्ञा इत्यनेन सुब्विधानसाधिका संज्ञा इति बुध्यते । पदं पदं प्रतिपदम्, प्रतिपदमर्हतीति प्रातिपदिकम् । तां संज्ञां विना शब्देभ्यः विभक्तयः न आयान्ति । तत्र द्विधा हि प्रातिपदिकसंज्ञायाः विधायकंसूत्रम् । प्रथमं "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" द्वितीयं तु "कृत्तद्धितसमासाश्च" इति । तेन स्मृतस्योपेक्षानर्हत्वात् स्वादिसन्धौ उपयोगिनी या प्रातिपदिकसंज्ञा, तस्याः विषयेऽत्र चर्चा विधीयते । शब्दा अपि अव्युत्पन्नाः व्यत्पन्नाश्च भवन्ति । अव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञाविधानार्थमिदं सूत्रं प्रवर्तते । अष्टाध्याय्याः प्रथमाध्यायस्य द्वितीयपादस्य पञ्चचत्वारिंशदस्ति इदं सूत्रम् । षड्विधेषु सूत्रेषु संज्ञाविधायकम् सूत्रम् । यतो हि संज्ञासंज्ञिविधायकं संज्ञासूत्रम्, अनेन च प्रातिपदिकसंज्ञा विधीयते । अर्थोऽस्यास्तीति अर्थवत् (मतुप्–प्रत्ययः), नपंसकलिङ्गानुसारात् शब्दस्वरूपमिति विशेष्यमध्याहार्यम् । न धातुः अधातु(नञ्तत्पुरुष– समासः) न प्रत्यय अप्रत्ययः(नञ्तत्पुरुषः), पदं पदं प्रतिपदम्, प्रतिपदमर्हतीति प्रातिपदिकम् । अत्र अधातुः, अप्रत्ययः इति पदद्वयं अर्थवद्विशेषणम् । उभयोरत्र विशेषणत्वात् विशेष्यानुसारं नपुंसकं इति तु न शङ्कनीयम्, 'परवल्लिङ्ग–द्वन्द्वतत्पुरुषयोः' इत्यनेन उभयोः पुँल्लिङ्गप्रसक्तेः । अर्थवत् प्रथमान्तम्, अधातुः प्रथमान्तम्, अप्रत्ययः प्रथमान्तं, प्रातिपदिकं प्रथमान्तम्, अतःचतुष्पदात्मकमिदं सूत्रम् । अस्यार्थो भवति यत्– धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरुपं प्रातिपदिकसञ्ज्ञं स्यात् । अस्मिन् सूत्रस्थानां सम्पूर्णाणां समासयुक्तानां पदानां विच्छेदं कृत्वा सरलया गिरा यथामति अत्रानुन्धानात्मके आलेखे व्याख्या विधीयते । एवं प्रकारेण शेखरमनोरमादिग्रन्थानुसारं बहूनां विषयाणां निरूपणमपि अत्र वर्तते । भाष्यकारस्य कतिपयानां मतानामपि सामान्यतया निरूपणमत्र विहितमस्ति । अतः अस्य आलेखस्य विषयः "अर्थवदधातुरप्रत्ययः प्रातिपदिकम् इत्यस्य सूत्रार्थविचारः" वर्तते ।*

**शब्दकुञ्जी**

प्रातिपिदकम्, शब्दार्णवः, प्रतियोगी, अनियोगी, स्फोटः

## विषयप्रवेशः

वेदस्य प्रधानाङ्गत्वेन सुप्रथितस्य व्याकरणग्रन्थस्य परम्परा प्राचीना विद्यते । "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशैः प्राङ्मुख उपविश्य महता प्रयत्नेन तत्र व्याकरणे स्थितानि सूत्राणि प्रणयति स्म । तत्र एकः वर्णोऽपि अनर्थको भवितुं नशक्नोति । *"ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाज ऋषिभ्यः ऋषयो ब्रह्मणेभ्यः"* (नेने, सन् २०१५, पृ.७) इति महाभाष्यस्य कथनं संस्मृत्य ज्ञायते यत् व्याकरणस्य (शब्दशास्त्रस्य) प्रथमप्रवक्तृरूपेण "ब्रह्मा" इत्ययं परिचीयते । इतिहासविदः विद्वांसः नवानां व्याकरणानां नामधेयानां सूचीः निर्मितवन्तः सन्ति । तानि यथा

*ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।*
*सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥ (नेने, सन् २०१५, भूमिका)*

व्याकरणस्य विशेषतः द्विधा परम्परा सुप्रसिद्धा अस्ति । माहेश्वरसम्प्रदाय ऐन्द्रसम्प्रदायश्च । इदानीन्तनैः अधिकाधिकैः वैयाकरणैः माहेश्वरसम्प्रदाय एव सम्बद्धैः भूयते । अस्मिन् सम्प्रदाये पाणिनि–कात्यायन–पतञ्जलीनां मुनित्रयाणां प्राधान्यमस्ति । किन्तु अस्य सम्प्रदायस्य प्राथमिकाचार्यः पाणिनिरस्ति । अनेनाचार्येण अष्टाध्यायीनामधेयो ग्रन्थो विरचितः । तदनु कात्यायनेन वार्तिकाणां पतञ्जलिना महाभाष्यस्य च रचना विहिता । पश्चादेव अन्ये ये टीकादिकृतः आचार्याः परिलक्षिताः ते आचार्याः द्विधा व्याकरणस्य व्याख्यानं कृतवन्तः । अष्टाध्यायीसूत्रानुसारिणी प्रथमा व्याख्या । तत्र च वामनजयादित्ययोः काशिकाख्या व्याख्या प्रसिद्धा । काशिकायाश्च पुनः जिनेन्द्रबुद्धिनामधेयेन आचार्येण न्यासाख्या व्याख्या कृता, हरदत्तेन पदमञ्जरीनाम्नी व्याख्या रमणीया व्याख्या समाम्नाता । अपरा च परम्परा प्रक्रियानुसारिण्याः व्याख्यायाः । तत्र प्रक्रियाकौमुद्यादयः ग्रन्थाः प्रसिद्धाः । भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौदीग्रन्थोऽपि एनामेव प्रक्रियां पुरस्कृत्य निर्मितोऽस्ति । तस्यैव वैयाकरणसिद्धान्तकौमुदीग्रन्थस्य प्रसिद्धिः अस्मिन् समये अस्ति । तत्रैव टीकाव्याख्यानादिपरम्पराः प्रचलन्त्यस्सन्ति ।

वस्तुतस्तु पाणिनीयव्याकरणस्य त्रिधा प्रवृत्तिः ।

अष्टाध्यायीक्रमः ।

प्रक्रियाक्रमः ।

दार्शनिकक्रमः ।

अष्टाध्यायीक्रमे अष्टाध्यायीस्थसूत्राणां क्रमरूपेण व्याख्या क्रियते । महामुनेः पतञ्जलेः महाभाष्यम्, वामनजयादित्ययोः काशिकावृत्तिः, भट्टोजिदीक्षितस्य शब्दकौस्तुभम् इत्यादीनि ग्रन्थरत्नानि अष्टाध्यायीक्रमानुसारेण लिखितानि सन्ति । प्रक्रियाक्रमे रामचन्द्राचार्यस्य प्रक्रियाकौमुदी, भट्टोजिदीक्षितस्य वैयाकरणसिद्धान्तकौमुदी इत्यादीनि प्रक्रियाक्रममनुसृत्य लिखितानि सन्ति । दार्शनिकक्रमेऽपि भर्तृहरेः वाक्यपदीयम् तथा च कैयटनागेशप्रभृतीनां प्रदीपोद्योतपरमलघुमञ्जूषादयः ग्रन्थाः निर्मिताः सन्ति ।

व्याकरणं नाम शब्दान्वाख्यानशास्त्रम् । शब्दार्णवः महान् । तत्र च निमज्जनचातुरीमादधानाः वैयाकरणाः । शब्दाः यद्यप्यखण्डास्तथापि बालानामर्थज्ञानसौकर्याय तत्र प्रकृतिप्रत्ययादिविभाजनद्वारा साधुशब्देभ्योऽसाधुशब्दानां पृथक्करणं व्याकरणं करोति । अतः असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिकरणं व्याकरणमुच्यते । तेन व्याकरणग्रन्थे शब्दस्य निर्माणप्रक्रिया विशेषरूपेण अभिधीयते । तत्र शब्दस्य प्रकृतिप्रत्ययाभ्यां विभागं विधाय तेषां कृतविभागानां प्रत्येकम् अर्थं निर्धार्य सम्पूर्णस्य अर्थबोधनं व्याकरणग्रन्थः कारयति ।

वस्तुतस्तु वैयाकरणाः शब्दस्य नित्यत्वं स्वीकृत्य स्फोटात्मकं शब्दम् अङ्गीकुर्वन्ति । यद्यपि शब्दस्य नित्यत्वस्वीकारेण स्फोटात्मकस्य शब्दस्य विभागः कर्तुं तु न शक्यते, तथापि एकोऽप्यखण्डो नित्योऽपि स्फोटः घटाकाशपटाकाशमठाकाशादिवद् उपाधिवशेन पदरूपः वाक्यरूपश्च भवितुं शक्नोति । अत एव नागेशनाभिहितं यत् "स च यद्यप्येकोऽखण्डश्च, तथापि पदं वाक्यं, जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशाद् लोहितः पीतः स्फटिकः इति भानवद् वर्णादिव्यङ्ग्यः वर्णरूपः पदरूपो वाक्यरूपश्च । (त्रिपाठी, सन् २०१७, पृ. ७५ ) अतः वैयाकरणानां सिद्धान्तानुरसारेण स्फोटात्मके शब्दे एव अर्थनिरूपिता शक्तिः अस्ति । तेन तस्यैव अर्थवाचकता । स च स्फोटात्मकः शब्दः वर्णपदवाक्यभेदेन त्रिधा । पुनः जातिव्यक्तिभेदेन षोढा । पुनश्च अखण्डपदस्फोटाखण्डवाक्यस्फोटाभ्यां तस्य स्फोटात्मकस्य शब्दस्य अष्टधा विभागः परिकल्प्यते ।

लोके तादृशाः शब्दाः द्विप्रकारकाः सन्ति । व्युत्पन्नौ अव्युत्पन्नाश्च । प्रकृतिप्रत्ययविशिष्टाश्शब्दाः व्युत्पन्नाः । येषु शब्देषु प्रकृत्यंशस्य प्रत्ययांशस्य पार्थक्येन प्रतीतिः भवति ते एव शब्दाः व्युत्पन्नाः शब्दाः । यत्र च शब्देषु इयान् भागः प्रकृत्यंशः इयान् भागः प्रत्ययांश इत्थंरूपेण ज्ञानं न भवति, ते शब्दाः अव्युत्पन्नाः । व्याकरणशास्त्रे तेषाम् अर्थबोधनसमर्थानां व्युत्पन्नाव्युत्पन्नशब्दानां प्रातिपदिकत्वेन व्यवहारः विहितः । किन्तु तेषां सर्वेषाम् अर्थबोधकानां शब्दानां प्रातिपदिकत्वेन व्यवहारः न दृश्यते । तेन अस्मिन् व्याकरणे प्रसिद्धा प्रातिपदिकसंज्ञा पारिभाषिकी । अतः प्रातिपदिकसंज्ञाविधानाय अस्मिन् पाणिनीये व्याकरणे द्वे सूत्रे स्तः । प्रथमम् *"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"* (मीमांसकः, सन् २००२, पृ. ६) इति, द्वितीयञ्च"कृत्तद्धितसमासाश्च" (मीमांसकः, सन् २००२, पृ.६)इति । किमर्थम् एताभ्यां सूत्राभ्यां प्रातिपदिकमिति महती संज्ञा कृता इति प्रश्ने केचित् विद्वांसः अन्वर्थतायै इति वदन्ति । तथाहि- पदं पदम् इति विग्रहे अव्ययीभावसमासे प्रतिपदं भवति । तदनु प्रतिपदम् उद्देश्यतया लब्धुम् अर्हतीति विग्रहे "तदर्हति" इति सूत्रेण ठकि प्रातिपदिकं भवति । वस्तुतस्तु आथर्वणश्रुत्यनुसारं प्रातिपदिकमिति महती संज्ञा कृता । तथा चाथर्वणे पठ्यते यत् - *"को धातुः, किं प्रातिपदिकम्?, कः प्रत्ययः? इति ।"* (नेने, सन् २०१८, पृ३५३, ३५४)द्वयोः प्रातिपदिकसंज्ञाविधायकयोः सूत्रयोः मध्ये "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यनेन सूत्रेण अव्युत्पन्नानामेव प्रातिपदिकसंज्ञा भवति । धातुं प्रत्ययं प्रत्ययान्तञ्च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् इति अस्य सूत्रस्यार्थः । (शर्मा, सन् २०११, पृ. १७३) किन्तु "कृत्तद्धितसमासाश्च" इत्यनेन सूत्रेण कृदन्तानां तद्धितान्तानां समासस्य च प्रातिपदिकसंज्ञा विधीयते । अस्मिन्नपि सूत्रे अर्थवदित्यस्य अनुवत्तिः अस्ति एव । किन्तु पूर्वसूत्रस्थोत्तरसूत्रस्थयोः अर्थवतोः पार्थक्यं दरीदृश्यते । पूर्वस्मिन् सूत्रे अर्थशब्दात् सम्बन्धार्थे मतुप् क्रियते । स च सम्बन्धः शब्दार्थयोरन्यास्याऽसंभवाद्वृत्तिरूप स्वीक्रियते । तेन पूर्वत्र सूत्रे वृत्तिमत्त्वमर्थवत्त्वम् इति स्वीक्रियते । वृत्तिमत्त्वरूपार्थः यदि धातुभिन्ने प्रत्ययभिन्ने प्रत्ययान्ततदादिभिन्ने शब्दस्वरूपे अस्ति चेत् तस्यैव *"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"* इत्यनेन सूत्रेण प्रातिपदिकसंज्ञा भवति । किन्तु "कृत्तद्धितसमासाश्च" इत्यस्मिन् सूत्रे अनुवृत्तं यद् अर्थवद् अस्ति तत्र तु अर्थशब्दात् प्रशंसारूपार्थे मतुप्प्रत्ययो भवति । अर्थगतं प्राशस्त्यं तु एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरूपम् अस्ति । इत्थंरूपेण द्वयोः सूत्रयोः अर्थवत्त्वं भिन्नम् अस्ति । तेन एतयोः सूत्रयोः पार्थक्येन बोधः विधेयः । अतः तयोः मध्ये पूर्वत्र विद्यमानं यत् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रम् अस्ति । तस्य प्रथमं तावत् विशेषरूपेण अवगमनं अत्र आलिख्यते । तत्र च "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रस्य अर्थापनं विधाय सूत्रघटकानां प्रत्येकं पदानां विचारं विधाय एतत्संज्ञाफलभूतविभक्तीतरानपेक्षया अर्थबोधकत्वरूपार्थवत्त्वं विस्तारेण विचार्य दोषं समुपस्थाप्य तेषां दोषाणां समाधानाय लक्षणं परिष्कृत्य निष्कर्षरूपेण लक्षणमपि प्रस्तूयतेऽस्मिन् आलेखे ।

### अध्ययनस्य प्रमुखाः समस्याः

*"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"* इति संज्ञासूत्रमस्ति। संज्ञासंज्ञिसम्बन्धबोधकत्वं संज्ञासूत्रत्वम्। इदं सूत्रं धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरूपस्य प्रातिपदिकसंज्ञां करोति । अव्युत्पन्नानां प्रातिपदिकसंज्ञाविधनार्थं इदम् सूत्रम् । अत्रालेखेऽस्य सूत्रस्य विशदरूपेणव्याख्याविवेचने च कृतेऽस्ति । शेखरमनोरमादिग्रन्थदिशानुसारेण अत्र सूत्रस्य वाक्यार्थबोधः कथं भवति ? तत्र स्थितानां सूत्रस्थपदानां केन सहान्वयो भवति ? तत्सर्वं अस्मिन् आलेखे यथामति पूर्णता प्राप्यते। आलेखेऽस्मिन् स्थिताः प्रमुखाः समस्याः अधो लिखिताः सन्ति।

क) सूत्रस्य परिष्कृतः परिमार्जितश्च अर्थः कः ?

ख) अस्मिन् सूत्रे अर्थवत्त्वं किम् ?

ग) कीदृशस्य शब्दस्य प्रातिपदिकसंज्ञा विधीयतेऽनेन सूत्रेण ?

### अध्ययनस्योद्देश्यम्

शोधसमस्यायां लिखितानां समस्यानां समाधानमेव प्रस्तुतशोधकार्यस्य मुख्यमुद्देश्यमस्ति । समस्याकथनप्रसङ्गे निर्दिष्टानां समस्यानां शेखरमनोरमादिग्रन्थानुसारं विवेचनं तथा च भाष्यसम्मतं व्याख्यानमेवास्यानुसन्धानस्योद्देश्यं वर्तते। सामान्यतया अनुसन्धानात्मकस्य अस्य लेखस्य उद्देश्यानि यथा :

क) शास्त्रार्थशैल्यां परिमार्जितस्यार्थस्य विवेचनम्।

ख) सूत्रस्थस्य अर्थवत्त्वस्य विवेचनम्।

ग) अनेन सूत्रेण कीदृशस्य शब्दस्य प्रातिपदिकसंज्ञा विधीयत इति विवेचनम्।

### अध्ययनविधिः

प्रस्तुतस्याध्ययनस्य कृते सामग्रीसङ्कलनार्थं पुस्तकालयस्योपयोगो विहितः । पाणिनीयसूत्रेषु केन्द्रीभूयसिद्धान्तकौमुद्याः, प्रौढमनोरमायाः तथा च लघुशब्देन्दुशेखरस्य अध्ययनं कृतम्। मुख्यतया पुस्तकालयीयं विधिमवलम्ब्यैव विहितमिदमध्ययनम्। अत्र व्याकरणसम्बद्धाः सूत्रार्थनिरुपादिता ग्रन्थाः प्रमुखसमाग्रीत्वेन प्रयुक्ताः वर्तन्ते। अन्ये व्याकरणसम्बद्धाः अनुदिताः ग्रन्था अपि द्वितीयसामग्रीत्वेन गृहीता अस्ति।

### अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

अस्मिन् आलेखे "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रस्य समग्रं परिष्कारपूर्वकं परिचयं प्रदाय लघुशब्देन्दुशेखरः, प्रौढमनोरमा, वैयाकरणसिद्धान्तानुसारं दीक्षितनागेशयोः मते सूत्रस्यास्य व्याख्यानावसारे यन्मतवैविध्यं विद्यते तस्य स्पष्टतया विवेचनम् विश्लेषणमेवास्य अनुसन्धानात्मकलेखस्य मूलं सीमा च वर्त्तेते।

### विषयनिरूपणाम्

आरोहणावरोहणक्रमयोर्मध्येऽवरोहणक्रमेण शब्दसाधुत्वाभिधायकग्रन्थरचनायां प्रवृत्तः श्रीमद्भट्टोजिदीक्षितः पूर्वं वाक्यस्यैवास्मत्सिद्धान्तसिद्धतया वाक्यस्फोटाभिव्यञ्जकवाक्यसाधुत्वबोधकं पञ्चसन्धिप्रकरणमुक्तवान् । ततश्च

वाक्यसाधुत्वबोधाय वाक्यघटकसुबन्तप्रकरणस्य सिद्ध्यै यतते । पञ्चसन्धौ स्वादिप्रत्ययानां स्मरणं भवति । तेन स्मृतिनिष्ठविषयितानिरूपितविषयताश्रयत्वविशिष्टोपेक्षानिष्ठविषयितानिरूपिताविषयत्वाभाववत्त्वरूपप्रसङ्गसङ्गतिमाश्रित्य स्वादिसन्धौ उपयोगिनी या प्रातिपदिकसंज्ञा, तस्याः विषयेऽत्र चर्चा विधीयते।

प्रातिपदिकसंज्ञायाः विषये तद्संज्ञाविधायकं सूत्रम् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति । अष्टाध्याय्याः प्रथमाध्यायस्य, द्वितीयपादस्य पञ्चचत्वारिंशं सूत्रमिदम् । षड्विधेषु सूत्रेषु संज्ञाविधायकं सूत्रम् । यतो हि संज्ञासंज्ञिसम्बन्धबोधकत्वं संज्ञासूत्रत्वम् अथवा शक्तिग्राहकत्वं संज्ञासूत्रत्वम् । अनेनापि सूत्रेण शब्दनिष्ठस्य प्रातिपदिकत्वस्य बोधनेन इदं सूत्रं संज्ञासूत्रं वर्तते। अस्मन् सूत्रे प्रातिपदिकमिति संज्ञादलमस्ति। अस्मिन् सूत्रे अर्थवद् प्रातिपदिकस्य विशेषणम्। तत्र अर्थवद् स्वोद्देश्यताकत्वसम्बन्धेन अथवा स्वनिष्ठोद्देश्यतानिरूपितविधेयतावत्त्वसम्बन्धेन प्रातिपदिके विशेषणम् । अधातुः , अप्रत्यय एतयोः अर्थवद् प्रति विशेषणत्वेन विशेषणतावच्छेदकौ एतौ । अर्थवद् अधातुः अप्रत्यय इति संज्ञिदलं विद्यते। अर्थोऽस्यास्तीति इत्यस्मिन् विग्रहे "तदस्यास्त्यस्मिन्निति मतुप्" (मीमांसकः, सन् २००२, पृ. ५६) इत्यनेन मतुपि मादुपधायाश्चमतोर्वोऽयवादिभ्यः" इत्यनेन मतुप्–घटकस्य मकारस्य वकारादेशे अर्थवद् इति भवति। मतुप्विधायकेन सूत्रेण षष्ठ्यर्थे सम्बन्धे अर्थे मतुप्प्रत्ययः विधीयते। अतः अर्थवद् इत्यत्रापि षष्ठ्यर्थे सम्बन्ध एव मतुप् भवति । तत्र सम्बन्धस्तु वृत्तिरूप एव सर्वदा सम्बन्धः प्रतियोगि–अनुयोगिनोः मिथः एव भवति । यस्मात् प्रत्ययः भवति, स एव प्रत्ययस्य प्रतियोगी । अर्थवद् इत्यत्रापि अर्थप्रकृतेः मतुब्प्रत्ययः भवति । तेन षष्ठ्यर्थसम्बन्धस्य प्रतियोगी अर्थः । किन्तु अत्र अनियोगिनः उल्लेखो नास्ति । येन न विना यत् अनुपन्नं तद् तेन आक्षिप्यते इति न्यायेन अनुयोगिनं विना सम्बन्धस्य असम्भवेन अत्र शब्दस्वरूपं इत्यस्य अनुयोगित्वेन आक्षेपः क्रियते । अतः अर्थवदित्यत्र आगत यः समबन्धार्थक मतुप्–प्रत्ययः अस्ति, तस्य अनियोगि शब्दस्वरूपम्, प्रतियोगी तु अर्थ इति अवगम्यते। अर्थशब्दस्वरूपयोः मिथः यः वृत्तिरूपः सम्बन्धः अङ्गीकृतः स वृत्तिरूपसम्बन्धः सर्वदा अर्थनिरूपित एव भवति। अतः अर्थवत्वमिति बोधयितुं वृत्तिमत्त्वं इत्यस्यापि प्रयोगः विधीयते। न धातुः इत्यस्मिन् विग्रहे नञ्तत्पुरुषे समासे कृते सति निष्पन्नोऽयमधातुशब्दः । अत्र नञर्थो भेदः अतः अधातु इत्यस्य अर्थः धातुभेदः अथवा धातुप्रतियोगिकभेदः। अस्यैव स्वरूपसम्बन्धेन अर्थवति अन्वयः। अतः धातुप्रतियोगिकभेदविशिष्टार्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात् इत्यर्थः लभ्यते । अत्र वैशिष्ट्यञ्च स्वरूपसम्बन्धेन । एवंरीत्या अप्रत्ययः इत्यस्यापि अर्थवति अन्वयः भूत्वा प्रत्ययप्रतियोगिकभेदविशिष्टार्थवत् शब्दस्वरूपं प्रातिपदिकसंज्ञा स्यात् इत्यर्थः । अत्रापि वैशिष्ट्यञ्च स्वरूपसम्बन्धेन एव । अनयोः सम्मिलितार्थः भवति धातुप्रतियोगिकभेदविशिष्टं प्रत्ययप्रतियोगिकभेदविशिष्टं च यत् अर्थवत् तद्प्रातिपदिकं स्यात् । इति सामान्यार्थः सूत्रस्य । अत्र अधातुः, अप्रत्ययः इति पदद्वयं अर्थवद्विशेषणम् । उभयोरत्र विशेषणत्वात् विशेष्यानुसारं नपुंसकं स्याद् इति तु न शङ्कनीयम्, 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्यनेन उभयोः पुँल्लिङ्गप्रसक्तेः।

अर्थवत् प्रथमान्तम्, अधातुः प्रथमान्तम्, अप्रत्ययः प्रथमान्तं, प्रातिपदिकं प्रथमान्तम्, अतः चतुष्पदमिदं सूत्रम्। अस्यार्थो भवति यत्– धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वाऽर्थवच्छब्दस्वरुपं प्रातिपदिकसञ्ज्ञं स्यात् । अत्राशङ्का भवति यद् अस्मिन् सूत्रे प्रत्ययन्तभिन्नः इत्यर्थं बोधयितुं किमपि पदं नास्ति किन्तु वृत्तौ धातुभिन्नः, प्रत्ययभिन्नः, प्रत्ययान्तभिन्नः यत् शब्दस्वरूपं तस्य प्रातिपदिकसंज्ञा विधीयते इति कथं आगच्छति ?इत्यस्यां जिज्ञासायां मनोरमायां श्रीमद्भट्टोजिदिक्षातेन सामाधानं दातुं प्रयत्यते यत् अस्मिन् सूत्रे तदर्थं बोधयितुं किमपि पदं नास्ति इति सत्यम्, किन्तु सूत्रकारेण "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्मिन् सूत्रे घटकतया प्रविष्टः यः अप्रत्ययः इति पदमस्ति । तस्य

पदस्य तन्त्रेण उच्चारणं विहितम् । तन्त्रत्वं नाम सकृदुच्चारितत्वे सति अनेकार्थबोधकत्वमिति । अत्राऽपि अप्रत्ययः इति सकृदुच्चारितं परन्तु तेन पदेन अनेकार्थः (प्रत्ययभिन्नः, प्रत्ययन्ताभिन्नश्च) बोध्यते । सूत्रकारेण तन्त्रद्वारा अप्रत्ययः इत्यस्य उच्चारणकृतेऽपि यः बोद्धा अस्ति स तु सर्वदा आवृत्त्या एव अनेकार्थस्य बोधं करोति । तेन तस्मिन् सूत्रे आवृत्त्या अप्रत्ययः अप्रत्ययः इति भवति । एकस्य अप्रत्ययस्य अर्थस्तु प्रत्ययभिन्नः भवति । अपरेऽस्मिन् अप्रत्यये अवयवत्वेन प्रविष्टः यः प्रत्ययः अस्ति स प्रत्ययमात्रस्यैव बोधकः तेन प्रत्ययमात्रपदघटितत्वेन अस्मिन् सूत्रे “प्रत्ययग्रहणे यस्मात् स विहितस्तदादेः तदन्तस्य ग्रहणम्” इति परिभाषा इति परिभाषया विशेषत्वेन तदादेः उपस्थितिः भवति । तदादिं प्रति अप्रत्ययघटकस्य प्रत्ययस्य विशेषणत्वेन "येन विधिस्तदन्तस्य" इति सूत्रस्य सहाय्येन प्रत्ययान्तस्य लाभः भवति । तेन प्रत्ययान्तेन सह अप्रत्ययघटकस्य नञः सम्बन्धे सति प्रत्ययन्ततदादिभिन्नः अर्थो लभ्यते ।

सूत्रकारेण अप्रत्ययः तन्त्रद्वारा उच्चारित इत्यत्र प्रमाणं तु "कृत्तिद्धतसमासाश्च" इति सूत्रे तद्धितग्रहणमेव ।यदि “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यस्मिन् सूत्रे प्रत्ययान्तभिन्न इत्यर्थो नास्ति चेत् तेनैव सूत्रेण प्रत्ययान्तस्यापि प्रातिपदिकसंज्ञा भवत्येव ।यतोहि "दाक्षि" इत्यस्य प्रत्ययान्तत्वेन तत्र प्रातिपदिकसंज्ञायाः सम्पादनाय "कृत्तद्धितसमासाश्च" इत्यत्र तद्धितस्य ग्रहणं विहितम् । पूर्वस्मिन् सूत्रे यदि प्रत्ययन्तदादिभिन्नः इत्यर्थः तन्त्रद्वारा न स्वीक्रियते चेत् "दाक्षि" इत्यस्य प्रत्ययान्तत्वेपि “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यनेन सूत्रेण खलु प्रातिपदिकसंज्ञा भवतीति, "दाक्षि" इत्यत्र प्रातिपदिकसंज्ञाविधानाय दत्तं तद्धितपदं व्यर्थं भवति । अतः व्यर्थं सत् किञ्चिद् ज्ञापयति यत् अस्मिन् सूत्रे अप्रत्ययः इति तन्त्रद्वारा उच्चारितः । केचनः संशेरते यत् "कृत्तद्धितसमासाश्च" इत्यत्र दत्तं तद्धितपदं व्यर्थं नास्तीति अप्रत्ययः तन्त्रद्वारा उच्चारितः इति वक्तुं न शक्यते । तथाहि "कृत्तद्धितसमासाश्च" इदं सूत्रं संज्ञासूत्रम् अस्ति । तेन अस्मिन् सूत्रे "संज्ञाविधौ प्रत्ययः ग्रहणे तदन्तग्रहणं नास्ति" इति परिभाषया "प्रत्ययग्रहणे तदन्तग्रहणं नास्ति" अस्याः परिभाषायाः बाधनेन कृत्पदेन कृत्प्रत्ययस्यैव बोधः तद्धितपदेन तद्धितस्यैव बोधो भवतीति तद्धितप्रत्ययस्य प्रातिपदिकसंज्ञाविधानाय तद्धितपदस्य सार्थक्यम् । अधुना, इःइत्यादीनां तद्धितप्रत्ययानां प्रातिपदिकसंज्ञा विधानाय तद्धितपदस्य "कृत्तद्धितसमासाश्च" इत्यस्मिन् सूत्रे आवश्यकता इति तद्धितपदस्य वैयर्थ्याभावेन तन्त्रद्वारा अप्रत्ययः इति उच्चारितः इति वक्तुं न शक्यते इति प्रश्नकर्तुः आशयः । अस्य प्रश्नस्य समाधानाय भट्टोजिदीक्षितेन कथितम् "अर्थवदित्यनुवृत्तिसामर्थ्यात् तदन्तग्रहणात्" । (नेने, सन् २०१८, पृ. ३२६) । अस्य आशयः यथावास्तविकरूपेण “संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति” (मिश्र, सन् २०१९, पृ. ११५) इति परिभाषायाः यदि प्रवृत्तिः भवति चेत् तर्हि “कृत्तद्धितसमासाश्च” इति सूत्रे घटक यः तद्धितशब्दः सः तद्धितपरक एव भवति । किन्तु “कृत्तद्धितसमासाश्च” अस्य सूत्रस्य संज्ञासूत्रत्वेऽपि “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यस्मात् सूत्रात् अनुवृत्तस्य अर्थवदित्यस्य सामर्थेन “संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति” इति बाधः भवति । “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इत्यस्मात् सूत्रात् “कतद्धितसमासाश्च” इत्यस्मिन् सूत्रे “अर्थवत्” इत्यस्य शब्दाधिकारः ।

शब्दाधिकारस्वीकारे सति अर्थवद्शब्दस्यैव उपस्थितिः न तु वृत्तिरूपार्थस्य । “कतद्धितसमासाश्च” इत्यस्मिन् सूत्रे अनुवृत्तस्य अर्थवदित्यस्य शब्दस्य अर्थशब्दात् प्रशंसायां मतुपि निष्पन्नत्वं सिद्ध्यति । अर्थगतप्राशास्त्यं तु एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वरुपमेव । अतः केवलतद्धिते तादृशस्य अर्थवत्त्वस्य अभावेन “संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति” इति परिभाषायाः अप्रवृत्यां प्रत्ययग्रहणे तदन्ता ग्राह्याः इति परिभाषया तदन्तस्य बोधेन “कृत्तद्धितसमासाश्च” इत्यस्मिन् सूत्रे तद्धितेन नहि तद्धितस्य संज्ञा भवति अपि तु तद्धितान्तस्य प्रातिपदिकसंज्ञा भवति । यदि “अर्थवदधातुरप्रत्ययः प्रातिपदिकम्” इतस्मिन् सूत्रे प्रत्ययान्तभिन्नः इत्यर्थ तन्त्रद्वारा न स्वीक्रियते चेत् अनेनैव

सूत्रेण प्रत्ययान्तस्यापि प्रातिपदिकसंज्ञाविधानेन तस्यैव प्रातिपदिकसंज्ञायै ग्रहणं कृतं यत् तद्धितपदं व्यर्थं भवति। अतः तद्धितपदं व्यर्थीभूय ज्ञाप्यते यत् "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इत्यस्मिन् सूत्रे अप्रत्ययः तन्त्रद्वारा उच्चारितः।

पुनः अत्राशङ्का भवति यद् अर्थवदधातुरप्रत्ययः प्रातिपदिकमिदमित्यत्र न धातुः अधातुः, न प्रत्ययः अप्रत्ययः इति नञ्समासो विहितः तत्रायं नञ् पर्युदासार्थको नञोऽर्थो अस्ति प्रसज्यार्थको वा कतरपक्षो ग्राह्यः? यतो हि उक्तमस्ति -

*द्वौ नञौ तु समाख्यातौ पर्युदासप्रसज्यकौ।*

*पर्युदासः सदृग्ग्राही प्रसज्यस्तु निषेधकृत्॥ (त्रिपाठी, सन् २०१७, पृ. १५९)*

अत्रोच्यते– न धातुः अधातुरित्यत्र लाघवात् पर्युदासः एव नञ् गृह्यते। तद्भिन्नस्य तत्सदृशस्य च अर्थबोधकस्य पर्युदासाख्यस्य एव नञः स्वीकारे धातु–प्रत्यय–प्रत्ययान्तभिन्नस्य अर्थवच्छब्दस्वरूपस्य प्रातिपदिकसंज्ञा भवति इत्यर्थलाभेन वाक्यभेदस्य, क्रियापदाध्याहारस्य, असमर्थसमासस्य च कल्पनापत्तिर्न दृश्यते। अन्यथा प्रसज्याश्रयणे वाक्यभेदो भवति। तथैव भवति इत्यादिक्रियायाः अध्याहारः नञः सम्बन्धाय अपेक्षितो भवति। एवमेव च असमर्थसमासापत्तिरपि भवति। नञः क्रियया अन्वये धातुना सहाऽन्वयाभावात् समस्यमानपदार्थानां परस्परान्वितत्वरूपसामर्थ्याभावादसामर्थ्येऽपि समासकल्पनापत्तिरिति।

न च यथा 'असूर्यम्पश्याः राजदाराः' इत्यादौ प्रसज्यार्थकनञः विद्यमानत्वेऽपि समासो दृश्यते तथैव अत्रापि स्यात्। किमर्थं पर्युदासम् स्वीकुरुते ? इति वाच्यम्, तत्र धर्मिग्राहकमानात्तथा कल्पनात्। "असूर्यललाटयोः दृशितपोः" इति सूत्रप्रामाण्यत्तत्र समासस्वीकारेऽप्यन्यत्र समासविधायकेषु सूत्रेषु समर्थः पदविधिः इति सूत्रस्य अधिकारात् ययोः द्वयोः पदार्थयोः परस्परमन्वयः, तयोः पदयोः परस्परसम्बन्धयोग्यता एव सामर्थ्यं भवति। यदि अधातुः, अप्रत्ययः इत्यादौ प्रसज्यनञ् स्वीक्रियते चेत्

*अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।*

*प्रसज्यप्रतिषेधोऽयं क्रियया सह यत्र नञ्॥ (त्रिपाठी, सन् २०१७, पृ. १५९)*

इत्यभियुक्तवचनात् प्रसज्यार्थकनञः क्रियया सहान्वयो भवति। सविशेषणानां वृत्तिर्न इति नियमाद् क्रियया सह सम्बद्धस्य नञः धातुपदेन सह समासो न सम्भवति। अतोऽत्र असमर्थसमासकल्पना स्वीकर्तव्या इति गौरवम् एवञ्च "अर्थवदधातुरप्रत्ययः प्रतिपदिकम्' इति सूत्रे धातोः प्रतिपदिकसंज्ञा न भवति। प्रत्ययस्य प्रातिपदिकसंज्ञा न भवति। अर्थवतः प्रातिपदिकसंज्ञा भवति। इति उच्यमाने वाक्यभेदेन महद्गौरवमपि स्यात्। तस्मात् अत्र पर्युदासार्थकेन नञा सहैव धातुपदादीनां समासविधानमुचितम् अत एव वाक्यभेदस्य क्रियापदाध्याहारस्य च कल्पना न भवति।

अत्र च यदि अर्थवद्ग्रहणं न क्रियते तर्हि धनवनादौ 'ध' 'न' इति प्रत्येकस्यापि प्रातिपदिकसंज्ञत्वात् स्वाद्युत्पत्तौ अनिष्टरूपापत्तिः स्यात्। अतः तद्वारणाय अर्थवदिति।

ननु भवतु प्रत्येकं प्रातिपदिकसंज्ञा न कुत्रापि अनिष्टापत्तिः, यतो हि व्यञ्जनानां प्रातिप्रदिकसंज्ञया स्वाद्युत्पत्तौ हल्ङ्यादिलोपेन निवृत्तिः स्यात्, स्वराणाम् च अव्ययत्वात् "अव्ययदाप् सुपः" इत्यनेन सुब्लुकि धनवनादौ न कापि क्षतिः? इति चेदुच्यते,

सत्यम् धनमित्यस्य नकारस्य नलोपः प्रातिपदिकान्तस्य इत्यनेन लोपापत्तिः स्यात् तस्मात् तथा वक्तुं न शक्यते इति। एवमेव अधातुरिति ग्रहणाभावे सति धातुष्वतिव्याप्तिः स्यात्, यतो हि हन्धातोर्लङि, तिपि, शपि, लुकि, इलोपे अडागमे हल्ङ्यादिलोपे अहनिति रूपम् अत्र धातोः प्रातिपदिसंज्ञायाम् निरवकाशत्वेन सुबपवादे तिङि उत्पन्ने लुप्ते

तस्मिन् प्रागुत्पन्नायाः प्रातिपदिकसंज्ञायाः अनपगमाद् नलोपः स्यात्, अतः अत्र नलोपवारणाय अधातुग्रहणं सार्थकम्। यदि च प्रत्ययलक्षणमाश्रित्य प्रत्ययान्तपर्युदासादेव प्रातिपदिकसंज्ञा न भवति इति भवता उच्यते चेत् श्रुणोतु, तत्र सुबुत्पत्तेः प्राक्प्रवृत्तप्रातिपदिकत्वस्य अनपगमाद् नलोपापत्तिर्भवत्येव, तथैव अप्रत्यय इति प्रत्ययपर्युदासस्तु हरिषु करोषि इत्यत्र सुप्सिपोरप्रत्ययान्तत्वात् अर्थवत्त्वाच्च प्रातिपदिकत्वे प्राप्ते तन्निवारणार्थम् अप्रत्यय इति विशेषणमावश्यकम्– यदि च सुप्सिपोः व्यपदेशिवद्भावेन प्रत्ययान्तत्वात् प्रत्ययान्तपर्युदासेनैव निवृत्तसम्भवे प्रत्ययपर्युदासः व्यर्थः इति चेत् श्रृणोतु 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेः तदन्तस्य ग्रहणम्" (मिश्र, सन्२०१९, पृ.९६) इत्यनया परिभाषया प्रकृतिप्रत्ययसमुदायस्यैव प्रत्ययान्ततदादित्वेन केवलप्रत्यययोः सुप्सिपोः प्रत्ययान्ततदादित्वालाभात् अर्थवदित्यत्र अप्रत्ययेति विशेषणदानमावश्यकम्।

ननु पुनः हरिषु इत्यादौ सम्पूर्णपदस्य प्रत्ययभिन्नतया कथं स्वादीनामुत्पत्यभावः।

अत्रोच्यते - सूत्रेऽस्मिन् 'अप्रत्यय' इत्यत्र तन्त्रेण प्रत्ययस्य प्रत्ययान्ततदादेश्च पर्युदासो भवतीति कृत्वा हरिषु इत्यादीनां प्रत्ययान्तत्वेन प्रातिपदिकत्वाभावात् प्रातिपदिकनिष्ठप्रयोजकतानिरूपितप्रयोज्यतावतामपि स्वादीनामभावस्सुतरां सिद्ध एव।

ननु भवद्भिरुक्तम् - प्रत्ययान्ततदादेः प्रतिषेधः भवतीति, अत्र च प्रत्ययपदे तदन्तविधिर्कृतः परन्तु "संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति" इति परिभाषया जागरुकत्वे अनया परिभाषया प्रातिपदिकरूपसंज्ञाविधौ प्रत्ययपदस्य तदन्तविधेर्निषेधसम्भवात् कथं पुनः प्रातिपदिकसंज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावात् प्रत्ययान्तपर्युदासः सम्भवति ? सत्यम्, अनया परिभाषया संज्ञानिष्ठविधेयतानिरुपितसाक्षादुद्देश्यताप्रयोजकं प्रत्ययपदं यत्र सूत्रे तादृशसंज्ञानिष्ठविधेयतानिरूपितसाक्षादुद्देश्यताप्रयोजकाभिन्नप्रत्ययपदनिष्ठघटकतानिरूपितघटिततावत्येव शास्त्रे निषेधो भवति नान्यत्र। सूत्रेऽस्मिन् संज्ञानिष्ठविधेयतानिरुपितसाक्षादुद्देश्यता प्रत्ययपदे नास्ति अपि तु अर्थवदित्यत्र वर्तते, अर्थान्नात्र साक्षात् प्रत्ययमुद्दिश्य प्रातिपदिकसंज्ञा विधीयते, अपि तु अर्थवन्तमुद्दिश्य। अतः प्रातिपदिकसंज्ञायाः साक्षादुद्देश्यमर्थवदिति, न तु अप्रत्यय इति। अप्रत्यय इति तु उद्देश्यविशेषणत्वादुद्देश्यतावच्छेदकीभूत इति त्वन्या वार्ता। अतः भवदुक्तपरिभाषया अत्र तदादिविशेष्यकतदन्तविधेः निषेधो न भवतीत्यर्थः।

वैयाकरणसिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन अर्थवदिति सूत्रे वृत्तिमत्त्वमर्थवत्त्वम् "कृत्तद्धितसमासाश्च" इति सूत्रे च एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वमर्थवत्त्वम् इति उभयत्र द्विविधमर्थवत्त्वं स्वीकृतम्। नागेशेन तु स्वग्रन्थे उभयत्र "एतत्संज्ञाफलभूतविभक्तीतरसमभिव्यहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम्" (नेने, सन् २०१५, पृ. १६०)अर्थवत्त्वमितिप्रतिपादितम्– अतः अत्र कतरः पक्षः स्वीक्रियते।

अत्रोत्तरम्- अहं मन्ये नागेशाभिमतमेव अर्थवत्त्वं स्वीकरणीयम्। यतो हि पूर्वोत्तरसूत्रे विभिन्नार्थवत्त्वग्रहणे अर्थवदित्यत्र गुरुभूतशब्दाधिकाराश्रयणम् , अप्रत्यय इति पर्युदासकरणम्, लक्षणद्वयमाश्रयणमिति बहुगौरवं स्यात्तस्मात् पूर्वोत्तरसूत्रसाधारण्येन एतत्संज्ञाफलभूतविभक्तीतरानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम् अर्थवत्त्वमिति नागेशाभिमतार्थवत्त्वंमेव सम्यक् प्रतिभाति। तथा च लक्षणसमन्वयप्रकारः एतस्य – रामशब्दादेः, या संज्ञा = प्रातिपदिकसंज्ञा, तत्फलभूता विभक्तिः उत्पस्यमाना स्वादिविभक्तिः, तदितरो घटादिः, तत्समभिव्यवहारानपेक्षयैव लोके राम इत्यादिशब्दतः दशरथापत्याद्यर्थविषयकबोधस्य जननादर्थवत्त्वं रामशब्दे आगतम्, अर्थवत्त्वात् प्रातिपदिकसंज्ञा स्वाद्युत्पत्तिश्च भविष्यतीति। तथा च नागेशाभिमतार्थवत्त्वस्वीकारे अप्रत्यय इति न कर्तव्यम् हरिषु इत्यत्र सु–प्रत्ययस्य

या प्रातिपदिकसंज्ञापत्तिः सा नास्त्येव। यतो हि सुप्रत्ययस्य विभक्तीतरप्रकृतिसापेक्षतयैव अर्थबोधकजनकत्वेन सुप्रत्यये विभक्तीतरानपेक्षयार्थबोधकजनकत्वं नास्ति। किञ्च शब्दाधिकारः लक्षणद्वयञ्चनेति लाघवमिति।

ननु भवदुक्तलक्षणस्य खट्वा पक्त्रिमम् इत्यादिलक्ष्येषु अव्याप्तिः, यतो हि एषु लक्ष्येषु विभक्तीतराः टाप् मप् इत्यादि–प्रत्ययाः तत्र एषां समभिव्याहारेणैवार्थबोधात् विभक्तीतराणामपेक्षा एव जाता अतः विभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमिति भवदुक्तं लक्षणमव्याप्तिदाषेण दूषितम्। यदि विभक्तिपदं प्रत्ययमात्रस्योपलक्षणमतः नास्माकं मते दोषः इत्युच्यते चेत् श्रृणु एधाञ्चक्रे इत्यत्र एधामित्यस्य प्रातिपदिकत्वाऽनुपपत्तिः अत्र प्रत्ययेतरचक्रेपदसमभिव्याहारापेक्षयैवार्थबोधकत्वात् नहि अर्थवत्त्वस्य लक्षणं एधामि गच्छति, परन्तु एधामित्यस्य भगवता भाष्यकारेण प्रातिपदिकसंज्ञा कृता वर्तते तथा तिङ्ङतिङिति सूत्रेण अतिङन्तात् एधामिति पदात्परस्य तिङन्तस्य चक्रे इत्यस्य निघातः स्वरः, तथा "वा पदान्तस्य" इत्यनेन विकल्पेन परसवर्णश्च विहितः। अतः एधामित्यत्र प्रातिपदिकत्वाभाव एव अस्माकमिष्ट इत्यपि वक्तुं न शक्यते तस्मात् दोषयुक्तमेव भवल्लक्षणम्।

अचोच्यते - सत्यं एधाञ्चक्रे इत्यत्र लक्षणस्याव्याप्तिर्जाता। परन्तु तत्र प्रत्ययेतरो यः पदेतरस्तत्समभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम् इति लक्षणे निवेशनीयम्। अत्र एतत्संज्ञाफलभूतप्रत्ययः तिङ् एतदन्यश्चक्रे इत्येतत्समभिव्याहारेणैव लोकेऽर्थबोधजनकत्वमस्ति तथापि अत्र चक्रे इति न पृथक् पदं पदेतस्यापेक्षाऽत्र नास्ति इति भवति लक्षणसमन्वयः।

ननु एतत्सञ्ज्ञाफलभूतप्रत्ययेतरो यः पदेतरस्तत्समभिव्यारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वमिति लक्षणं स्वीकृत्य विभक्तिपदम् प्रत्ययमात्रस्योपलक्षणमिति परिष्कारेऽपि इन्द्राणी वरुणानी इत्यादौ एतत्संज्ञाफलभूतप्रत्ययेतरः य आनुक् तत्समभिव्याहारापेक्षयैव लोकेऽर्थविषयकबोधजनकत्वेनार्थवत्त्वानापत्तेः पुनरपि लक्षणमव्याप्तिदोषेण दूषितम् इति चेत्, सत्यम्। अत एव लक्षणे विभक्तिपदस्य प्रत्ययागमोभयोपलक्षणत्वं स्वीक्रियते। अथवा एतत्सञ्ज्ञाफलभूतेतरसमभिव्याहारानपेक्षया इत्येव लक्षणम् अत्र स्वीकरणीयम् इत्येतावतैव सामञ्जस्यादिति।

न चैवं पञ्च नावः प्रिया यस्येति विग्रहे उत्तरपदे परे द्विगुतत्पुरुषे टच्प्रत्यये अवादेशे सति पञ्चानावप्रियः इत्यस्य सिद्धिर्भवति। अत्र एतत्संज्ञाफलभूतप्रत्ययेतरो यः प्रियपदेतरघटादिस्तत्समभिव्याहारानपेक्षयाऽर्थबोधकत्वात् पञ्चगवेति टचन्तमात्रस्यार्थवत्त्वापत्तिः स्यात्, अतः लक्षणमिदमतिव्याप्तिदोषेया दूषितमस्तीति शङ्का न्याय्या, लक्षणे प्रत्ययेतरो यः स्ववृत्तिसमासत्वाभाववत् पदेतरस्तत्समभिव्याहारानपेक्षयेत्यस्य निवेशेन दोषस्य निवारणीयत्वात्। तथा च अत्र स्वपदेन यस्य प्रातिपदिकत्वं चिकीर्षितं तद्ग्राह्यम् स्ववृत्तिसमासत्वाऽभाववत् पदमुदासीनघटादिपदम् तदितरप्रियपदसमभिव्याहारानपेक्षयैवार्थबोधकत्वात् पञ्चनावः इत्येतावन्मात्रस्य न प्रातिपदिकसंज्ञा अतो न दोषः। एतत्संज्ञाफलभूतप्रत्ययेतरो यः स्ववृत्तिसमासत्वाभाववत्पदेतरस्तत्समभिव्याहारानपेक्षया लोकेऽर्थविषयकबोधजनकत्वम् उभयसूत्रसाधारणं अर्थवत्त्वमिति स्वीकारे सति न कुत्रापि दोषः। तस्मान्मन्ये नागेशाभिमतमेव लक्षणं न्याय्यम्।

## निष्कर्षः

अव्युत्पन्नशब्दानुद्दिश्यप्रातिपदिकसंज्ञां विधातुं"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रं वर्तते। अत्र अधातुः, अप्रत्ययः अर्थवद् शब्दस्वरूपम् इति उद्देश्यदलम्। प्रातिपदिकम् इति विधेयदलम्। अधातुः, अप्रत्यय इत्यत्र पर्युदासनञ्। अप्रत्ययपदे तन्त्रेण एकशेषेण वा प्रत्ययस्य प्रत्ययान्तस्य च पर्युदासः। धातुनिष्ठप्रतियोगितानिरूपकभेदनिष्ठाधेयतानिरूपिताधिकरणतावद् धातुनिष्ठप्रतियोगितानिरूपकसादृश्यानुयोगि, अथ च

प्रत्ययनिष्ठप्रतियोगितानिरूपक-भेदनिष्ठाधेयतानिरूपिताधिकरणतावद् प्रत्ययनिष्ठप्रतियोगितानिरूपकसादृश्यानुयोगि, अथ च प्रत्ययान्ततदादिनिष्ठप्रतियोगितानिरूपकभेदनिष्ठाधेयतानिरूपिताधिकरणतावद् प्रत्ययान्ततदादिनिष्ठ-प्रतियोगितानिरूपकसादृश्यानुयोगि यद् अर्थवच्छब्दस्वरूपम्, तादृशार्थवच्छब्दस्वरूपनिष्ठोद्देश्यता-निरूपितविधेयतावती प्रातिपदिकसंज्ञा भवतु इति अस्य सूत्रस्य विशिष्टोऽर्थः। अत्र च सूत्रे सम्बन्धरूपेऽर्थे मतुब्विधानात् शब्दार्थयोः सम्बन्धस्य च वृत्तिरूपत्वाद्वृत्तिमत्त्वमर्थवत्त्वमिति दीक्षितमतम्। उत्तरसूत्रे च अर्थाधिकारमाश्रित्य प्रशंसार्थे मतुप आश्रयणात् एकार्थीभावेन लौकिके प्रयोगे प्रसिद्धत्वमेवार्थवत्त्वमिति दीक्षिताशयः। नागेशभट्टास्तु उभयत्र पृथक्पृथगर्थवत्त्वे मानाभावात् गौरवाच्च एतत्संज्ञाफलभूतविभक्तीतरसमभिव्याहारानपेक्षया लोकेऽर्थविषयबोधजनकत्वरूपमेकमेवार्थवत्त्वमुभयसूत्रसाधारणमिति निरूपयाञ्चकार। इत्थञ्चात्रालेखे अर्थवत्सूत्रस्य विशिष्टार्थाभिधानपूर्वकमर्थवत्त्वस्य पारमार्थिकं परिष्कृतं स्वरूपमुपपादितम्।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च हार्दमुपकारं कृतवद्भ्यः सर्वेभ्यो परामर्शप्रदायकेभ्योविज्ञगुरुजनेभ्यः, अन्येभ्यः सहयोगिभ्यश्च सश्रद्धया कृतज्ञतास्मरणं तथा हार्दैः धन्यवादशतैः सभाजनमपि अर्पयामि अस्तु।

## सन्दर्भसामग्रीसूची

कौण्डभट्टः. (२०२९). *वैयाकरणभूषणसारः*. (प्रभाकरः मिश्रः, सं.) वाराणसी: श्रीरामानुजसंस्कृतमहाविद्यालयः.

त्रिपाठी,डाँ.जयशङ्करलाल (सन् २०१७) *परमलघुमञ्जूषा*, वाराणसीः चौखम्बाकृष्णदास अकादमी।

नेने पं. गोपालशास्त्री (सन् २०१५) *लघुशब्देन्दुशेखरः*, वाराणसीः चौखम्बासंस्कृतसंस्थानम्।

नेने पं. गोपालशास्त्री (सन् २०१८) *प्रौढमनोरमा*, वाराणसीः चौखम्बासंस्कृतसंस्थानम्।

पतञ्जलिः. (सन् १९९९). *महाभाष्यम्* (द्वितीयं संस्करण सम्पाद., भा. पञ्चमो भागः). (गुरुप्रसादः शास्त्री, सम्पादक) दिल्ली: प्रतिभा प्रकाशन.

भट्टोजिदीक्षितः. (२००१). *वैयाकरणसिद्धान्तकौमुदी* (भा. द्वितीयो भागः). (गिरिधरशर्मा चतुर्वेदः, सम्पादक) दिल्ली: मोतीलाल बनारसीदास.

भर्तृहरिः. (सन् १९४२). *वाक्यपदीयम्*. (पेरिसर्वेश्वरः शर्मा, अनुवादक) वाराणसी: मोतीलाल बनारसीदास.

मिश्र आचार्य मिश्र (सन् २०१९) *परिभाषेन्दुशेखरः*वाराणसीः चौखम्बासुरभारतीप्रकाशनम्।

मिश्रः राममनोहरः. (२०४०). *भूषणसारपरमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा*. वाराणसी : सम्पूर्णानन्दविश्वविद्यालयः.

मीमांसकः, युधिष्ठिरः (सन् २००२) *अष्टाध्यायी*, वाराणसीः चौखम्बासुरभारतीप्रकाशनम्।

शर्मा, गिरिधरः, (सन् २०११) *वैयाकरणसिद्धान्तकौमुदी*, प्रथम भागः, मोतिलाबनारसीदासः।